# Suryakritam Narayana Stotram

# સૂર્યકૃતં નારાયણસ્તોત્રમ્

## Document Information

Text title : Suryakritam Narayana Stotram

File name : sUryakRRitaMnArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 42/29-45||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# સૂર્યકૃતં નારાયણસ્તોત્રમ્

ૐ નમઃ તેજઃપ્રસવિત્રે બૃહતેઽવ્યયતેજસે ।
તેજસ્વિભ્યોઽવ્યયતેજઃપ્રદાત્રે બ્રહ્મણે નમઃ ॥ ૨૯॥

યસ્ય ગાવો ભૂરિશ‍ૃઙ્ગા અયાસો ભાન્તિ વર્ષણે ।
ઈશનીષુ તદીશેષુ યસ્ય ભ્રાજ્યોઽન્વયં યયુઃ ॥ ૩૦॥

નમો ભ્રાજિષ્ણવે તસ્મૈ ગોમતે ગોપ્રસારિણે ।
હૃત્તમોદ્રાવિણે દિવ્યાસાય દેવાય તે નમઃ ॥ ૩૧॥

પ્રકાશયિતૃસંરાજે સ્વપ્રકાશકૃણે નમઃ ।
નમો ભાવિત્તિવિપ્રાય જ્ઞાનપ્રબોધસૂરિણે ॥ ૩૨॥

નમઃ શ્રાણવિધાતસ્તે નમ આત્મસદાત્મને ।
નમો રાજિષ્ણવે દીવ્યન્ સમભાજનુદાયિને ॥ ૩૩॥

નમો ભૌમાય રક્તાય નમો દિવ્યાય વિદ્યુતે ।
નમઃ સૂર્યાય ચોગ્રાય નમો હિરણ્મયાય તે ॥ ૩૪॥

નમઃ ખાનેયસદ્ધેમ્ને નમ ઉદર્યતેજસે ।
નમ ઉડુપભાવાય નમો યાવત્પ્રભાત્મને ॥ ૩૫॥

નમઃ કાર્યસ્વરૂપાય નમઃ કારણરૂપિણે ।
હિરણ્મયાય દેવાય બ્રહ્મણે પરમાત્મને ॥ ૩૬॥

ત્વં સ્રષ્ટા ત્વં પોષયિતા સંહર્તાઽપિ ત્વમેવ વૈ ।
ત્વમેવ પરમં તેજસ્તેજસ્વિનાં દૃગગ્રજમ્ ॥ ૩૭॥

સદા તેજઃપ્રદાનેન રક્ષ માં પરમેશ્વર ।
ચક્ષુષ્મન્તશ્ચ યાવન્તો ભજિષ્યન્તિ પ્રભાપ્રભુમ્ ॥ ૩૮॥

ત્વમેવ ભગવાન્ ભાવાન્ પ્રભાવાઁશ્ચ પ્રભાસ્વરઃ ।
ત્વમેવ નેત્રવાન્ ત્રાતાઽઽમત્રાતા ચાઽવનીશ્વરઃ ॥ ૩૯॥

મહશ્ચક્ષુઃ સ્વર્ગચક્ષુર્ભુવશ્ચક્ષુસ્ત્વમેવ હિ ।
ભૌમચક્ષુઃ સર્વચક્ષુશ્ચક્ષુષાં ચક્ષુષે નમઃ ॥ ૪૦॥

ૐ ૐ ૐ ભૂર્ભુવઃ સ્વસ્તત્ ૐ તત્સવિતુર્વરેણ્યમ્ ।
ભર્ગો દેવસ્ય ધીમહિ ધિયો યો નઃ પ્રચોદયાત્ ॥ ૪૧॥

ઇતિ મન્ત્રં તુ યઃ કોઽપિ જપેદ્ધ્યાયેદતન્દ્રિતઃ ।
હિરણ્મયઃ પરો દેવઃ સાક્ષાદ્ભાતિ તદગ્રતઃ ॥ ૪૨॥

અયુતં જપનાત્તસ્ય સ્વયં સૂર્યો મહાન્પ્રભુઃ ।
વરદો ભવતે તસ્ય ભગવત્ત્વં દદાતિ ચ ॥ ૪૩॥

દિવ્યં કરોતિ તચ્ચક્ષુરુદ્ઘાટયતિ ચાન્તરમ્ ।
ઉત્તેજયતિ ચાત્માનં સમ્પાદયતિ બ્રહ્મ તત્ ॥ ૪૪॥

તસ્માદ્ધ્યાનપરો ભૂત્વા જપેત્સ્વશ્રેયસે સદા ।
સ્તોત્રં સૂર્યકૃતં સ્વોપાસ્ત્યર્થં હિરણ્મયસ્ય વૈ ॥ ૪૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૪૨-અધ્યાયાન્તર્ગતં
સૂર્યકૃતં નારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૪૨/૨૯-૪૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 42/29-45..

Proofread by PSA Easwaran

*Suryakritam Narayana Stotram*
pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*